International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(5): 83-85
© 2018 IJSR
www.anantaajournal.com
Received: 11-07-2018
Accepted: 15-08-2018

**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

**Correspondence**
**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

# पार्वणादिश्राद्धमहिमा

**S Sitarama Rao**

## प्रस्तावना

अपरपक्षेश्राद्धंकुर्वीत[1]

इति गृह्यपरिशिष्ठवचनात्कृष्णपक्षेश्राद्धमितिसमस्तमाससम्बन्ध्यपरपक्षस्यश्राद्धकालत्वंप्रतीयते । श्राद्धमितिकर्मणोनामधेयम् ।

श्रद्धयाविहितं कर्म इति, स्मृतेश्चश्राद्धमनेनभुक्तमिति । पिण्डदानप्राधान्येहिभुज्यार्थानुपपत्तिः । तस्मात् समुदाय नामधेयमितिज्ञायते । गृह्यव्याख्यानेश्राद्धशब्दविवेचनम् –

युजषांपिण्डदानंतुबह्वचां द्विज तर्पणम् ।
श्राद्ध शब्दाभिदेयंस्यादुभयंसामवेदिनामिति[2] ॥

**ब्रह्माण्डे**

देशकाले च पात्रे च श्रद्धयाविधिना च यत् ।
पितृनुद्दिश्यविप्रेभ्योदत्तंश्राद्धमुदाहृतम्[3] ॥ इति

**आपस्तम्बोऽपि**

श्राद्धशब्दं कर्म प्रोवाच । पितरो देवता ब्राह्मणास्त्वाहवनीयार्थ इति ।
देवतोद्देशेनयथाहवनीयेहोमस्तथापितृद्देशेनब्राह्मणेदत्तंश्राद्धमित्यर्

**अपरपक्षश्राद्धविषयेमनुवचनमेवमस्ति**

कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशीम् ।
श्राद्धेप्रशस्तास्तिथयोयथैता न तथेतराः[5] ॥

**याज्ञवल्क्यःश्राद्धकालविषये**

अमावास्याऽष्टकावृद्धिःकृष्णपक्षोऽयनद्वयम्।

द्रव्यं ब्राह्मण सम्पत्तिर्विषुवत्सूर्यसङ्क्रमः ॥

व्यतीपातोगजच्छायाग्रहणंचन्द्रसूर्ययोः ।

श्राद्धंप्रतिरुचिश्चैतेश्राद्धकालाःप्रकीर्तिताः[6] ॥

अमावास्या, युगादिः, सङ्क्रान्तिः, वैधृति-व्यतीपात-महालयनां-पुर्वेद्युः अष्टकान्वष्टकाः महातीर्थप्राप्तिः, मृतेऽहनि,ग्रहणद्वयं, श्राद्धंप्रतिरुचिः, श्रोत्रियादिब्राह्मणसम्पत्तिः, अर्घोदय, कपिलाषष्ठ्याद्यलभ्ययोगाः, ग्रहपीडाः, दुःस्वप्नदर्शनम्, नवान्नप्राप्तिः, नवोदकप्राप्तिः, गृहप्रच्छादननिमित्तानिश्राद्धकालाः इति श्राद्धमार्ताण्डकारवचनात्ज्ञायते । एवं अमावास्या युगादि कालेषु तथा च नित्य – नैमित्तिक – काम्य – वृद्धिश्राद्ध, सपिण्डीकरण – पार्वण – गोष्ठी – शुद्धि – कर्माङ्ग दैविक यात्राङ्गपुष्ट्यङ्गभेदेन च द्वादशविधश्राद्धानिपूर्वाचार्यैः कथितंभवति । विघ्नवशात्दर्श-मासिक-सांवत्सरिकश्राद्धानिरात्रावपिप्रथमप्रहर-पर्यन्तंकार्यम् । अमावास्यादि विहित श्राद्धानिपार्वण-आम-हिरण्य-ब्रह्मर्पण-चटादिरूपेणआचरणंविहितंभवति ।

**३.९.७ श्राद्धाचरणप्रयोजनम्**

वसुरुद्रादितिसुताःपितरःश्राद्धदेवताः ।

प्रीणयन्तिमनुष्याणांपितॄन्श्राद्धेनतर्पिताः॥

आयुःप्रजांधनंविद्यांस्वर्गमोक्षंसुखानि च ।

प्रयच्छन्ति तथा राज्यंप्रीतानृणांपितामहाः[7] ॥

**गरुडपुराणोक्तपार्वणश्राद्धफलम्**

अनेनविधिनाश्राद्धंकृतंवैयत्रकुत्रचित् ।

अक्षयास्यात्पितृणां च सर्वप्राप्तिर्ध्रुवा तथा ।

इत्युक्तंपार्वणंश्राद्धंपितृणांब्रह्मलोकदम्[8] ॥

तस्यान्नममृतंभूत्वादेवत्वेऽप्यनुयाति च ।

गन्धर्वेभोगरूपेणपशुत्वे च तृणंभवेत् ॥

श्राद्धंहिवायुरूपेणनागत्वेऽप्यनुगच्छति ।

फलंभवतिपक्षित्वेराक्षसेषुतथाऽऽमिषम् ॥

दानवत्वे तथा मांसंप्रेतत्वेरूधिरं तथा ।

मनुष्यत्वेन्नपानादिबाल्येभोगरसोभवेत्[9] ॥

श्राद्ध आचरणेनवसु, रुद्र, अदिति सुताःपितृदेवताः, देवदत्तादयश्राद्धदेवताःश्राद्धेनतर्पिताः नाम सन्तुष्टाःभूत्वा, मनुष्याणांकृते नाम श्राद्ध कर्तॄणांकृतेआयुः, प्रजां, धनं, विद्याम्, स्वर्गम्, मोक्षम्, सुखानि, राज्यम् च । शास्त्रोक्तमन्यदपिफलंप्रयच्छन्तीतिगम्यते । मत्स्यपुराणेऽपिश्राद्धा-चरणफलमेवंप्रस्तौति । यथा –

वसून्वदन्ति च पितॄन्रुद्रांश्चैवपितामहान् ।

प्रपितामहांस्तथादित्यानित्येवंवैदिकीश्रुतिः ॥

नामगोत्रेपितॄणान्तुपावकंहव्यकव्ययोः ।

श्राद्धस्यमन्त्राश्रद्धा च उपयोज्यश्चभक्तितः ॥

अग्निष्वात्तादयस्तेषामाधिपत्येव्यवस्थिताः ।

नामगोत्रंकालदेशाःभवान्तरगतानपि ॥

प्राणिनःप्रीणयन्त्येतेतदाहारत्वमागतान् ।

देवो यदि पिताजातश्शुभकर्मासुयोगतः ॥

तस्यान्नममृतंभूत्वादिव्यत्वेप्यनुगच्छति ।

दैत्यत्वेभोगरूपेणपशुत्वे च तृणंभवेत् ॥

श्राद्धन्नंवायुरूपेणसर्पत्वेप्युपतिष्ठति ।

पानंभवतियक्षत्वेगृध्रत्वेऽपितथामिषम् ॥

दनुजत्वेदथामायाप्रेतत्वेरुधिरोदकम् ।

मनुष्यत्वेन्नपानानिनानाभोगरसंभवेत् ॥

रतिश्शक्तिःस्त्रियःकान्तिःभोज्यंभोजनशक्तिता ।

दानश्शक्तिस्सविभवरूपमारोग्यमेव च ॥

श्राद्धपुष्पमिदंप्रोक्तंफलंब्रह्मसमागमः ।

आयुःपुत्रंधनंविद्यांस्वर्गमोक्षंसुखानि च ॥

राज्यंचैवप्रयच्छन्तिप्रीताःपितृगणोनृणाम् ।

श्रूयते च परंमोक्षंप्राप्ताःकौशिकमानवः ।

पञ्चभिर्जन्मसमृन्धैर्गताविष्णोःपरंपदम्[10] ॥

**वसु-रुद्र-**

आदित्यादिरूपेणव्यवह्वीयमाणाःत्रयःहव्यकव्यादीन्गृहीत्वापित्रादि गणेभ्यःआहारंदीयते । देवलोकेस्थितश्चेत्अमृतत्वमिव, असुरश्चेत्भोगमिव, पशुश्चेत्तृणैरिवतेभ्यः तेभ्यः स्थानाननुसृत्यइमं-श्राद्धान्नंअन्नपानभोगादीनामिवतेभ्यःगच्छति । मानवैकृतैः श्राद्धादिकर्मभिः तृप्ताः सन्तः पितृदेवताः, आयुः-पुत्र-यशः-स्वर्ग-मोक्षादीनिददातीतिज्ञायते । तथा च आश्वलायनस्मृतिरत्नेऽपिआयुः,पुत्र,धन,यश,पश्वादिफलानिअनुगृह्णन्तिपितर इति अवगम्यते । यथा –

यत्रश्राद्धं न कुर्वन्तितत्रानर्थोभविष्यति ।
प्रजाश्चपशवोरायोहीयस्तेचखिलार्थकः ॥
निस्वाश्शुचयश्शान्तासशक्त्याभक्त्याविधौनरः ।
श्राद्धं ये चापिकुर्वन्तितेमोदन्तेदिवीह च ॥
तेषांपितृप्रसादेनवर्धन्तेसम्पदःक्रमात् ।
प्रजाश्चपशवोरायस्सम्पदश्चाखिलाश्शनैः ॥
भक्त्याबित्तानुसारेणतस्माच्छ्राद्धंसमाचरेत् ।
शास्त्राध्वनास्थिरमतिरप्रमत्तस्सुसंयुतः[11]॥

**सन्दर्भ–सूची**


1. पारस्करगृह्यसूत्रपरिशिष्टम् श्राद्धसूत्रम् 1
2. पारस्करगृह्यसूत्रपरिशिष्टम् श्राद्धसूत्रम् पृ.494
3. पारस्करगृह्यसूत्रपरिशिष्टम् श्राद्धसूत्रम्.पृष्ठम् 494
4. पारस्करगृह्यसूत्रपरिशिष्टम् श्राद्धसूत्रम्.पष्ठम् 494
5. मनुस्मृतिः 3.286
6. याज्ञवल्क्यस्मृतिः 1.217-218
7. याज्ञवल्क्यस्मृतिः 1.269,270
8. गरुडपुराणम् 11.8.34
9. गरुडपुराणम् 10.5-7
10. मत्स्य पुराणम् 19.3.12-22
11. आश्वलायन स्मृति रत्नम् 13.163-166